प्रजनः स्वेषु दारेषु शौचमद्रोह एव च ।
आर्ज्जवं भृत्यभरणं न वै ते सार्व्ववर्णिकाः ।
ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम् ।
दममेव महाराज धर्म्ममाहुः पुरातनम् ।
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते ।
तं चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्म्मणि ।
अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम् ।
कुर्व्वीतोपेत्य सन्तानमथ दद्याद्यजेत च ।
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः ।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥ * ॥
क्षत्त्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव ।
दद्याद्राजा न याचेत यजेत न च याजयेत् ।
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम् ।
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः ।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः ।
अविक्षतशरीरो हि संगराद्यो निवर्त्तते ।
क्षत्त्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम् ।
क्षत्त्रियाणामयं धर्म्मो निर्णीतो मुनिभिः परः ।
नास्य कृत्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात् ।
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते ।
तस्माद्राज्ञा महाराज योद्धव्यं धर्म्मशीलिना ।
प्रजाः स्वेषु च धर्म्मेषु स्थापयेत महीपतिः ।
धर्म्मेणाप्येव हि कर्म्माणि कारयेत् सततं
प्रजाः ।
परमां सिद्धिमाप्नोति नृपतिः परिपालनात् ।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो राजन्य उच्यते ॥ * ॥
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः ।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः ।
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममन्वेयन् ।
विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत् ।
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात् ।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः ।
ब्राह्मणेभ्यश्च राज्ञे च सर्व्वाः परिददे प्रजाः ।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं भवेत् ।
लब्धाच्च सप्तमं भागं तथा शृङ्गे कलक्षुरे ।
शस्यानां सर्व्ववीजानि एषा सांवत्सरी भृतिः ।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये रक्षति नान्येन रक्षितव्याः कथञ्चन ॥ * ॥
शूद्रस्यापि हि यो धर्म्मस्तं ते वक्ष्यामि भूपते ।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत् ।
तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते ।
तेषां शुश्रूषणाच्चैव महत् सुखमवाप्नुयात् ।
शूद्र एतान् परिचरेत् त्रीन् वर्णाननुपूर्व्वशः ।
सञ्चयांश्च न कुर्व्वीत जातु शूद्रः कथञ्चन ।
पापीयान् हि धनं लब्ध्वा वशे कुर्य्याद्गरीयसः ।
राज्ञा वा समनुज्ञातः कामं कुर्व्वीत धार्म्मिकः ।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते ।
छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे ।
अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः ।
शूद्रायैव प्रदेयानि तस्य धर्म्मधनं हि तत् ।
यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुरावजेत् ।
कल्प्यन्तेऽस्य तु तेनाहुर्वृत्तिं धर्म्मविदो जनाः ।
देयः पिण्डोऽनपत्याय भर्त्तव्यौ वृद्धदुर्ब्बलौ ।
शूद्रेण च न हातव्यो भर्त्ता कस्याञ्चिदापदि ।
अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये ।
न हि स्वमस्ति शूद्रस्य भर्त्तृहार्य्यधनो हि सः ।
उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च पार्थिव ।
स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते ।
तस्माच्छूद्रः पाकयज्ञैर्यजेत व्रत स्वयम् ।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ॥ * ॥
श्रीनारद उवाच ।
इदानीमाश्रमाणाञ्च धर्म्मं वक्ष्यामि भूमिप ।
ब्रह्मचर्य्याश्रमं तावत् शृणु सर्व्वाधिवासन ।
गत्वा गुरुगृहं शिष्यो नमस्कृत्य गुरुं शुचिः ।
ब्रूयादध्येतुमायातः शिष्योऽहं तव मारिष ।
ततस्तस्याज्ञया नित्यमध्येतव्यं नराधिप ।
सदा विचारः शास्त्रस्य गुरुपादाभिवादनम् ।
तदाज्ञापालनञ्चापि ध्यानं दैवतभावना ।
लाभेन येन केनापि तुष्टिः सद्भिः समागमः ।
समाप्तविद्यो गुरवे दक्षिणां प्रतिपाद्य च ॥ * ॥
गृहाश्रमं ततो गच्छेद्गुरोराज्ञामधिव्रजन् ।
उद्वहेत् कुलजां कन्यां सुशीलां धर्म्मचारिणीम् ।
अनहंवादिनीं सौम्यां सुचरित्रां प्रियंवदाम् ।
गृहिणां प्रथमो धर्म्मोऽतिथिपूजैव पार्थिव ।
अप्राप्य पूजामतिथिर्यस्य गेहान्निवर्त्तते ।
स याति नरकं घोरं पुण्यं तस्मै प्रदाय च ।
प्रथमं स्वागतं पृच्छेदासनञ्चापि संदिशेत् ।
पाद्यञ्च मधुपर्कञ्च दद्यात् प्रणतिपूर्व्वकम् ।
संवादञ्च प्रियालापं कुर्य्यात्तेन सहात्मनः ।
भोजनञ्च यथाशक्ति कारयेदतिथिं नृप ।
देवाश्च पितरश्चापि प्रीयन्तेऽतिथिपूजने ।
आतिथ्यसदृशं कर्म्म गृहस्थानां न विद्यते ।
यस्य नित्यं स्थितिर्नास्ति सोऽतिथिःपरिकीर्त्तितः ।
सर्व्वाश्रमाणामधिको गृहाश्रम उदाहृतः ।
यस्मात्तस्मिन् समायान्ति भिक्षार्थमाश्रमाश्रयाः ।
पितृदेवार्च्चनं कार्य्यं गृहिणा सुखमिच्छता ॥ * ॥
वानप्रस्थाश्रमं वक्ष्ये तृतीयं जगतीपते ।
वानप्रस्थाश्रमं गच्छेत् कृतकृत्यो गृहाश्रमात् ।
तदारण्यकशास्त्राणि समधीत्य स धर्म्मवित् ।
ऊर्द्ध्वरेताः प्रव्रजित्वा गच्छत्वचरसात्मताम् ।
सुते भार्य्यां परिन्यस्य वनं गच्छेत् सहैव वा ।
शान्तः शुद्धान्तरात्मा च सर्व्वभूतहिते रतः ।
चरितब्रह्मचर्य्यस्य ब्राह्मणस्य विशाम्पते ।
कर्त्तव्यावीह्‌राजेन्द्र कथ्यन्ते मुनिपुङ्गवैः ।
भैक्ष्यचर्य्यास्वधीकारः प्रशस्त इह मोक्षिणः ।
यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः ।
यथोपलब्धजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः ।
निराशीः स्यात् सर्व्वसमो निर्योगो निर्व्विकार-
वान् ।
विवेकी धनपूजादौ विरक्तः करुणः सदा ।
संसारं स्वप्नवद्वीक्ष्य शान्तः सन्तुष्टमानसः ।
पत्रमूलफलाहारी जलाशी वायुभोजनः ।
निराहारोऽथवा शुद्धोऽहर्निशं तप आचरेत् ।
एवं कुर्व्वन् महाभाग ब्राह्मणः सिद्धिमाप्नुयात् ।
चतुर्थमाश्रमं वक्ष्ये मुक्तिसोपानमेव हि ।
गुरोः पुरोधमासाद्य भिक्षुः सन्न्यासधर्म्मवित् ।
विचरेत् सकलां पृथ्वीं लब्धाशी शान्त उत्सुकः ।
योगाभ्यासरतो नित्यं धर्म्मसञ्चयतत्परः ।
धर्म्माधर्म्मविहीनो वा भिक्षुकः सिद्धिमा-
प्नुयात् ॥”

इति पाद्मे स्वर्गखण्डे २५।२६।२७ अध्यायाः ॥ * ॥ अन्यत् नारसिंहपुराणे ५८ अध्याये मार्कण्डेय-पुराणे मदालसोपाख्याने कूर्म्मपुराणे २ । ३ अध्याये च द्रष्टव्यम् ॥ * ॥ * ॥ गजचित्रकम्बलः । हातीर झुल इति भाषा । तत्पर्य्यायः । प्रवेणी २ आस्तरणम् ३ परिस्तोमः ४ कुथः ५ कुथा ६ । इत्यमरः ॥ प्रवेणिः ७ परिस्तोमः ८ कुथम् ९ । इति भरतः ॥ शुक्लादिः । रङ् इति ख्यातः । स च बहुविधो यथा । श्वेतः १ पाण्डुः २ धूसरः ३ कृष्णः ४ पीतः ५ हरितः ६ रक्तः ७ शोणः ८ अरुणः ९ पाटलः १० श्यावः ११ धूम्रः १२ पिङ्गलः १३ कर्व्वुरः १४ । इति चामरः ॥ गर्भस्थबालकस्य षष्ठे मासि वर्णो भवति । इति सुखबोधः ॥ यशः । गुणः । स्तुतिः । इति मेदिनी । णे, २६ ॥ स्वर्णम् । व्रतम् । रूपम् । अक्षरम् । भेदः । गीतक्रमः । चित्रम् । तालविशेषः । अङ्गरागः । इति हेमचन्द्रः ॥

वर्णः, पुं क्ली, ( वर्ण्यते भिद्यते इति । वर्ण + घञ् । ) भेदः । ( वर्ण्यते दीप्यतेऽनेनेति । ) वर्ण + घञ् । ) रूपम् । ( वर्णयति । वर्ण + अच् । ) अक्षरम् । (वर्ण्यते रज्यते इति । वर्ण + घञ् ।) विलेपनम् । इति मेदिनी । णे,२६ ॥ * ॥ वर्णश्च द्विविधः । ध्वन्यात्मकः अक्षरात्मकश्च । अस्योत्पत्तिप्रकारो यथा,—
“अनेकधान्मुखश्रोत्रमार्गस्याविषदाक्षरम् ।
अव्यक्तं प्रलपति यदा सा कुण्डली तदा ।
मूलाधारे विष्वक्ति सुषुम्नां वेष्टते मुहुः ॥”
इति प्रपञ्चसारः ॥

अस्यार्थः । मुखश्रोत्रमार्गस्यावैषद्यात् अनेक-स्माद्धेतोर्यदा सा कुण्डली अविषदाक्षरं अवि-स्पष्टमक्षरं यत्राव्यक्ते ध्वनौ तं प्रलपति अर्थात् कलभाषणादिकं करोति तदा मूलाधारे विष्व-क्ति शब्दायते सुषुम्नाञ्च मुहुर्व्वेष्टते । इति तट्टीका ॥ * ॥ अस्य कुण्डलीस्वरूपत्वं यथा,—
“कुण्डलीभूतसर्पाणामङ्गश्रियमुपेयुषी ।
त्रिधामजननी देवी शब्दब्रह्मस्वरूपिणी ।
द्विचत्वारिंशद्वर्णात्मा पञ्चाशद्वर्णरूपिणी ।
गुणिता सर्व्वगात्रेषु कुण्डली परदेवता ।
विश्वात्मनाप्रबुद्धा सा सूते मन्त्रमयं जगत् ।
एकधा गुणिता शक्तिः सर्व्वविश्वप्रवर्त्तिनी ।